# .. kRikArAdi shrI kRiShNAShTottarashatanAmastotram ..

## ॥ कृकारादि श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

Document Information

Text title : kRikArAdi kRiShNAShTottarashatanAmastotram
File name : kRikArAdikRiShNa108nAmastotram.itx
Category : aShTottarashatanAma
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ कृकारादि श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

कृष्णः कृती कृपाशीतः कृतज्ञः कृष्णमूर्धजः ।
कृष्णाव्यसनसंहर्ता कृष्णाम्बुधरविग्रहः ॥ १॥

कृष्णाब्जवदनः कृष्णाप्रकृत्यङ्गः कृताखिलः ।
कृतगीतः कृष्णगीतः कृष्णगोपीजनाम्बरः ॥ २॥

कृष्णस्वरः कृत्तजिष्णुगर्वः कृष्णोत्तरस्त्रजः ।
कृतलोकेशसम्मोहः कृतदावाग्निपारणः ॥ ३॥

कृष्टोलूखलनिर्भिन्न यमलार्जुनभूरुहः ।
कृतगोवर्धनच्छत्रो कृताहिफणताण्डवः ॥ ४॥

कृत्ताघः कृत्तभक्ताघः कृतदैवतमङ्गलः ।
कृतान्तसदनाधीतगुरुपुत्रः कृतस्मितः ॥ ५॥

कृतान्तभगिनीवारिविहारी कृतवित्प्रियः ।
कृतगोवत्ससन्त्राणः कृतकेतरसौहृदः ॥ ६॥

कृत्तभूमिभरः कृष्णबन्धुः कृष्णमहागुरुः ।
कृष्णप्रियः कृष्णसखः कृष्णेशः कृष्णसारथिः ॥ ७॥

कृतराजोत्सवः कृष्णगोपीजनमनोधनः ।
कृष्णगोपीकटाक्षालि पूजितेन्दीवराकृतिः ॥ ८॥

कृष्णप्रतापः कृष्णाप्तः कृष्णमानाभिरक्षणः ।
कृपीटधिकृतावासः कृपीटरुहलोचनः ॥ ९॥

कृशानुवदनाधीशः कृशानुहुतखाण्डवः ।
कृत्तिवासस्स्म्ययाहर्ता कृत्तिवासोज्वरार्दनः ॥ १०॥

कृत्तबाणभुजाबृन्दः कृतबृन्दारकावनः ।
कृतादियुगसंस्थाकृत्कृतसद्धर्मपालनः ॥ ११॥

कृतचित्तजनप्राणः कृतकन्दर्पविग्रहः ।
कृशोदरीबृन्दबन्दीमोचकः कृपणावनः ॥ १२॥

कृत्स्नवित्कृत्स्नदुर्ज्ञेयमहिमा कृत्स्नपालकः ।
कृत्स्नान्तरः कृत्स्नयन्ता कृत्स्नहा कृत्स्नधारयः ॥ १३॥

कृत्स्नाकृतिः कृत्स्नदृष्टिः कृच्छलभ्यः कृताद्भुतः ।
कृत्स्नप्रियः कृत्स्नहीनः कृत्स्नात्मा कृत्स्नभासकः ॥ १४॥

कृत्तिकानन्तरोद्भूतः कृत्तरुक्मिकचव्रजः ।
कृपात्तरुक्मिणीकान्तः कृतधर्मक्रियावनः ॥ १५॥

कृष्णपक्षाष्टमीचन्द्र फालभागमनोहरः ।
कृत्यसाक्षी कृत्यपतिः कृत्स्नक्रतु फलप्रदः ॥ १६॥

कृष्णवर्मलसच्चक्रः कृपीटजविभूषणः ।
कृताख्यारूपनिर्वाहः कृतार्थीकृतबाडबः ॥ १७॥

कृतवन्यस्त्रजाभूषः कृपीटजलसत्करः ।
कृपीटजालयावक्षाः कृतपादार्चनाम्बुजः ॥ १८॥

कृतिमेतरसौन्दर्यः कृतिमाशयदुर्लभः ।
कृतताक्ष्र्यध्वजरथः कृतमोक्षाभिधेयकः ॥ १९॥

कृतीकृतद्वापरकः कृतसौभाग्यभूतलः ।
कृतलोकत्रयानन्दः कृतीकृतकलिप्रथः ॥ २०॥

कृतोत्तरागर्भरक्षः कृतधी कृतलक्षणः ।
कृतत्रिजगतीमोहः कृतदेवद्रुमाहृतिः ॥ २१॥

कृत्स्नानन्दः कृत्स्नदुःखदूरः कृत्स्नविलक्षणः ।
कृत्स्नांशः कृत्स्नजीवांशः कृत्स्नसत्तः कृतिप्रियः ॥ २२॥

॥ इति श्री कृकारादि कृष्णाष्टोत्तरशतम् विश्वावसु
श्रावणा बहुल चतुर्थी स्थिरवासरे रामेण लिखितं
समर्पितं च श्री हयग्रीवाय ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIn-
dra

.. kRikArAdi shrI kRiShNAShTottarashatanAmastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*